**दिनाङ्कः:- 10 .04.2024**
**प्रात:- 06:55**

## अथ वार्ता:

प्रचाराभियानम्

लोकसभानिर्वाचनाय प्रचारः द्रुत गत्यां प्रचलति। प्रमुखराजनैतिकदलानां शीर्षनेतारः देशस्य विभिन्नभागेषु भ्रमणं कृत्वा स्वपक्षीयोम्मीदवाराणां समर्थने सार्वजनिकसभाः, यात्राः च आयोजयन्ति। भाजपेति दलस्य-वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी ह्यः गतसायं चेन्नैनगरे मार्ग प्रदर्शने तमिलनाडोः द्विदिवसीययात्रायाः आरम्भं कृतवान्। सः विशेषविमानयानेन चेन्नैनगरं सम्प्राप्तवान चेन्नई दक्षिण, उत्तर, मध्य लोकसभा निर्वाचनक्षेत्रेषु भाजपेति दलस्य प्रत्याशिनः डॉ. तमिलिसाई सौन्दरराजन, पौल कनगराज, विनोज.पी.सेल्वम् इत्यादीनां कृते मतं याचितवान्। द्विकिलोमीटर परिमितं यावत् मार्गप्रदर्शनं पनागल-उद्यानाद् आरभ्य, एल्डम्स्-मार्गे, तेनाम्पेट्-इत्यत्र च समाप्तम्। श्रीमोदीना सह राज्यभाजपा अध्यक्षः के.अन्नमलाई इत्यादयः आसन्। अद्य भाजपेति दलस्य-अभियान प्रचारकः , श्रीमोदी द्वे जनसभे सम्बोधयिष्यति, प्रथमं वेल्लोर-नगरस्य, कोयम्बटूर-समीपे द्वितीयं मेट्टुपालयं-नगरे च। तत्रैव स्टालिनः स्वीय प्रचाराभियानावधौ अवदत् यत् अपर्याप्तधनानां कारणेन अभाजपाप्रशासितराज्यानि सर्वदैव हानियुतानि भवन्ति। सः ए.आइ.ए.डी.एम.के.-दलस्य चतुर्वर्षीय कार्यकाले निष्क्रियः आसीत् इति आलोचितवान्। ध्येयास्पदं वर्तते यत् अस्य मासस्य ऊनविंशति: दिनाङ्के तमिलनाडुराज्ये ऊनचत्वारिंशत् लोकसभासनानां कृते एकचरणीयमतदानं भविष्यति।

## केंद्रियगृहमन्त्रालयः

निर्वाचनायोगेन स्वतन्त्र निष्पक्ष लोकसभानिर्वाचनाय केन्द्रियगृहमन्त्रालयं पश्चिमबङ्गाले केन्द्रीय-सशस्त्र-अर्धसैन्य-बलस्य शताधिकाः अन्याः उद्यमाः नियोजयितुं निर्देशः दत्तः। सूत्रानुसारेण, आयोगस्य निर्देशेन गृहमन्त्रालयेन केन्द्रिय-रिज़र्व-आरक्षी-दलस्य पञ्चपञ्चाशत् उद्यमाः सुरक्षाबलस्य पञ्चचत्वारिंशत् उद्यमाः च नियोजिताः सन्ति।

## विदेशमन्त्री डॉ. एस जयशंकरः

ह्यः नवदिल्लीनगरे विदेशमन्त्री डॉ. एस जयशंकरः बेल्जियमदेशस्य विदेशमन्त्रालयस्य महासचिवः 'थियोडोरा जेन्ट्जिस्' इत्यनेन सह मिलितवान्। एकस्मिन् अन्तर्जालीय संदेशे डॉ. जयशंकरः अवदत् यत् भारत-बेलजियम-यूरोपीयसङ्घानां च आर्थिक-राजनैतिक-सहकार्यस्य सुदृढीकरणस्य विषये चर्चां कृतवन्तः। डॉ. जयशंकरः अर्धचालकस्य, हरित-विकासस्य च विषये विचाराणां आदान-प्रदानं अपि कृतवान्।

## दिल्ल्याः राउज़-एवेन्यू-न्यायालयः

दिल्ल्याः राउज़-एवेन्यू-न्यायालयेन दिल्ली-उत्पाद-शुल्क-नीति- प्रवञ्चनासम्बद्धे धनशोधन-प्रकरणे भारत-राष्ट्र- समीत्याः नेत्र्या: के-कवितायाः न्यायिक-करावासावधिः अस्मिन् मासस्य त्रयोविंशति: दिनाङ्कपर्यन्तं समेधिताः।

## आई.पी.एल. क्रिकेट्

आई.पी.एल्. क्रिकेटप्रतिस्पर्धायां: ह्यः चण्डीगढस्य महाराजा-यादविन्द्रसिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडांगणे पंजाब-किंग्स-दलं-सनराइजर्स-हैदराबाद-इत्यनेन दलेन स्पर्धायां द्वाभ्यां धावनांकाभ्यां पराजितम्। तत्रैव अद्य अन्यतमा प्रतिस्पर्धा जयपुरस्य सवाईमान-सिंह-क्रीडांगणे राजस्थान-रॉयल्स-गुजरात-टाइटेन्स-दलयोर्मध्ये सायं सार्धसप्तवादने भविष्यति।

**।। इति वार्ता : ।।**